# .. Shri Bhairavi StavarAja ..

# ॥ श्रीभैरवीस्तवराजः ॥

## Sanskrit Document Information

Text title : bhairavI Stavaraja

File name : bhairavIstavarAja.itx

Category : stavarAja

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 1, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 1, 2016

*sanskritdocuments.org*

# ॥ श्रीभैरवीस्तवराजः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीउमामहेश्वराभ्यां नमः ॥

॥ अथ भैरवीस्तवराजप्रारम्भः ॥
ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपं
    जानन्ति नैव जगदादिमनादिमूर्तिम् ।
तस्माद्वयं कुचनतां नव कुङ्कुमाभां
    स्थूलां स्तुमः सकलवाङ्मयमातृभूताम् ॥ १॥
सद्यः समुद्यतसहस्रदिवाकराभां
    विद्याक्षसूत्रवरदाभयाचिह्नहस्ताम् ।
नेत्रोत्पलैस्त्रिभिरलङ्कृतवक्त्रपद्मां
    त्वां तारहाररुचिरां त्रिपुरे भजामः ॥ २॥
सिन्दूरपूररुचिरं कुचभारनम्रं
    जन्मान्तरेषु कृतपुण्यफलैकगम्यम् ।
अन्योन्यभेदकलहाकुलमानसास्ते
    जानन्ति किं जडधियस्तवरूपमम्ब ॥ ३॥
स्थूलां वदन्ति मुनयः श्रुतयो गृणन्ति
    सूक्ष्मां वदन्ति वचसा मधिवासमन्ये ।
त्वां मूलमाहुरपरे जगतां भवानि
    मन्यामहे वयमपारकृपाम्बुराशिम् ॥ ४॥
चन्द्रावतंसकलितां शरदिन्दुशुभ्रां
    पञ्चाशदक्षरमयीं हृदि भावयन्तीम् ।
त्वां पुस्तकं जपवटीममृताम्बुकुम्भं
    व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्राम् ॥ ५॥

शम्भुस्त्वमद्रितनया कलितार्द्धभागो
    विष्णुस्त्वमम्ब कमलापरिरब्धदेहः ।
पद्मोद्भवस्त्वमपि वागधिवासभूमे-
    स्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥ ६॥
आश्रित्य वाग्भवभवांश्चतुरः परादीन्

भावान्पदेषु विहितान्समुदीरयन्तीम् ।
कण्ठादिभिश्च करणैः परदेवतां त्वां
संविन्मयीं हृदि कदापि न विस्मरामि ॥ ७॥
आकुञ्च्य वायुमवजित्य च वैरिषट्क-
मालोक्य निश्चलधिया निजनासिकाग्रम् ।
ध्यायन्ति मूर्ध्नि कलितेन्दुकलावसन्तं
त्वद्रूपमम्ब कृतिनस्तरुणार्कमित्रम् ॥ ८॥
त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं
सृष्टिं करोषि जगतामिति वेदवादः ।
सत्यं तदद्रितनये जगदेकमात-
र्नो चेदशेषजगतः स्थितिरेव न स्यात् ॥ ९॥
पूजां विधाय कुसुमैः सुरपादपानां
पीठे तवाम्ब कनकाचलगह्वरेषु ।
गायन्ति सिद्धवनिताः सह किन्नरीभि-
रास्वादितासवरसारुणनेत्रपद्माः ॥ १०॥
विद्युद्विलासवपुषः श्रियमुद्वहन्तीं
यान्तीं स्ववासभवनाच्छिवराजधानीम् ।
सौषुम्नवर्त्मकमलानि विकासयन्तीं
देवीं भजे हृदि परामृतसिक्तगात्राम् ॥ ११॥
आनन्दजन्मभवनं भवनं श्रुतीनां
चैतन्यमात्रतनुमम्ब तवाश्रयामि ।
ब्रह्मेशविष्णुभिरुपासितपादपद्मां
सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥ १२॥
शब्दार्थभावि भवनं सृजन्तीन्दुरूपा या
तद्बिभर्ति पुनरर्कतनुः स्वशक्त्या ।
ब्रह्मात्मिका हरति तत्सकलं युगान्ते
तां शारदा मनसि जातु न विस्मरामि ॥ १३॥
नारायणीति नरकार्णवतारिणीति
गौरीति खेदशमनीति सरस्वतीति ।
ज्ञानप्रदेति नयनत्रयभूषितेति
त्वामद्रिराजतनये बहुधा वदन्ति ॥ १४॥

ये स्तुवन्ति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् ।
त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते नराः श्रियम् ॥ १५॥

॥ इति श्रीरुद्रयामले भैरवीस्तवराजः सम्पूर्णम् ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

.. Shri Bhairavi StavarAja ..
was typeset using XƎLaTeX 0.99996
on October 1, 2016

Please send corrections to *sanskrit@cheerful.com*